क्रियानाधारकारकयोगाक्रमानेन सत्त्वरूपत्वमुपपद्यते इति कारके पूर्वत्वात् केचिदिह उष्ट्रासिका हतशायिका शब्दयोस्तत्सह
योलक्षणं स्त्रीकत्वमासंते इत्यादिना रभिधान्वयमाह मनोरमायां आसिकाः शायिकाः इति च द्वितीयाबहुवचनं क्रियाविशेष
णत्वेन कर्मत्वात् न चैवं क्लीवत्वमेकवचनान्तत्वं च स्यादिति वाच्यं स्त्रियां क्तिन्नित्यधिकारात् स्त्रीत्वावधारणेन सामान्ये नपुंस
कमिति स्याप्रवृत्तेः बहुत्वावधारणेनैकवचनाप्रवृत्तेश्चेत्यकं स्यसिच्सीयुट्तासिषु भावकर्मणोरुपदेशेऽज्झनग्रहदृशां वा चिण्वदिट् च इति सूत्रमुप
पदे शास्त्रस्वरवर्णविशेषणं न हनादीनामच्यादेशासत्त्वाद्ग उपदेशेऽचः इति उपदेशेऽजन्तानामिति न व्याख्यानं तथा हि सति
णिजन्तस्य तस्यान्तस्योपदेशाभावात् उपदेशोऽहि तत्त्वाडुच्चारणं भवणंतस्य नहयाश्लिष्टत्वादिति वत्तमंतादृतिः स्यसिच् सीयुट्
तासि इति प्रतियोगिनि सप्तमीनिर्देशादतोऽप्याचष्टे तिङ्वाचेति ननु चिण्णिद्वद्भावस्य वृद्ध्यादिकार्यं स्यातिदेशो घानिष्यते अ
प्राप्तिप्यते इत्यत्र हनो वधादेशः इणो गादेश इङो गाङ्देशो वि स्यादिति चेत् मैवं अंगाधिकारस्थलेन स्यांगस्यैव कार्यस्यातिदेशात्

अमुलोपः । नामिलादौ जनी जृष् धित्या दिनामित्येव मितामुपधाया नित्यं जस्येषामे दीर्घो नेने विकल्प्यते एवं ताभाविति णिलोपस्य स्थानिव
त्वेन स्यवधाना दिति भावः दीर्घः सिध्यतीति न पदान्ते ते ति निषेधादित्यर्थः ननु निपादीस्थे दीर्घे कर्तव्ये स्थानिवत्त्वाभावः पूर्वत्रासिद्
मित्यनेनैव सिद्ध इति दीर्घग्रहणस्योपयोगाभावे पि एवं ताऐऐ चि णमुलो रिति दीर्घे कर्तव्ये स्थानिवद्भाव निवारणाय दीर्घग्रहणमावश्य
कमित्यत आह ज्ञातिएव निर्देशाति इदं मास्त्विति ह्रस्वविकल्पेना पो हं सिध्यतीति भावः वस्तुतस्तु चिणमुलोः ह्रस्वो ह्रस्वविकल्प
माने अहि हि अहीति स्यादीर्घे तु अहिहि अहीडीति भवति एतत्रापि [illegible] यटेस्य एवं पापामित्यादि चिणि अपंरामि [illegible]
पंशामि णमुलि पंशमं पंशमं पंणामं पंशाममित्यादि द एवं दीर्घोनास्तीति यदोष्ठ [illegible] लोपस्य स्थानिवत्त्वेन णिच्यरत्वाभावा
न्नुपधादीर्घस्योपधाह्रस्वप्रवृत्तेः लभाच फलभेदादीर्घग्रहणमत्यावश्यकं न तु ज्ञापनार्थ इति भावः [illegible] मुनिनेति अकर्मकत्वाज्ञा
वेलः नोदात्तोपदेशस्य [illegible] तिलुङि पामः दमः [illegible] तिलुङि पामः [illegible] शमकः [illegible] उपदेश इति किं शमीदमी इह घिनुणि कृते व
[illegible] न स्वरेणोदात्तत्वाभावान्निषेधो न स्यात् [illegible] इति चेत् अत्राहुः निरुक्त
मेषणं [illegible] तथाचाणिचोः कृत्वा [illegible] इति प्रयोगः संज्ञा
एवं कविरनित्यत्वाहृष्यभावशेषं अथवा उद्यमो परमोपरम शब्दो [illegible] विधानाद्बोध्यौ णिङुणि वो [illegible] णिङन्ता णिजन्ता
[illegible] णिलोपे सति [illegible] मिति भावः विभाषा लभेश्चेत्यतो लभे रिति वर्त्तते णमुलि लभं लभं लाभं
लाभं [illegible] द्विकर्मका [illegible] किं [illegible] कर्मणि उक्तं गौणे किं वा नयोरि
ति संदेहव्यवस्थामाह द्विकर्मकाणां त्विति दुह्याचेति [illegible] श्लोके [illegible] प्रदर्शिताः [illegible]
[illegible] यस्य कर्मसंज्ञा [illegible] द्विकर्मकास्तत्र व्यवस्थामाह बुद्धि
[illegible] निजेच्छयेति [illegible] कर्मणीत्यर्थः [illegible] यस्य कर्मसंज्ञा [illegible] प्रयोज्ये [illegible]
[illegible] कर्मसंज्ञा यस्य [illegible] कर्म [illegible] इति गत्यर्था कर्मकर्तृकरो [illegible] इति गतीत्यर्थे [illegible]

ध्यति व्यपदेशिवद्भावेन णिजेवाणिजन्तस्तदवयवकं शास्त्रीयं गमित्यादि अयणोत् आर्धितास्या रितेस्याद्यपि सिध्यति अधातुः तथा
तु ण्योपदेशोऽजन्तस्तदवयवकं भवत्यारस्मारित्युंगमिति दिक् नित्यग्रहणानुवृत्तेरिति नित्यं छंदसीति सूत्रात् काशिकायां तु सुशेवहि
रंगलक्षणस्यासिद्धत्वादभक्तत्वात्संयोगादित्वमंगस्य नास्तीति गुणोऽत्र न प्रवर्तते इत्युक्तं सुदृकाः सर्वे इति विधीयमानः कर्मक्तोन त्वेग(
स्तेनासंयोगादेव अगमित्यभक्तत्वादित्याशयः तनौतेर्यकि किदत्वोरिति मत्वा दादित्तिये विभाषेति कर्मग्रहणं उदाहरणमिति ध्वनयति
आत्मनेपदलक्षणार्थ इति भावे पीत्युदाहरणमित्याह पायेनपंते इति अविचार्यैव कर्मकृत्वा पश्चादर्शोऽचीत्यर्थः कर्मकर्तरि तु तत्र क्रिया
यामुदाहरिष्यति आलोचते अचो ञ्णितीत्यतो ञ्णितीत्यनुवर्तनेन चकृते विशेषणं न तु चिणस्तस्याणित्वेन व्यभिचारात् चिण्कृ
तोः किं चौरिः वालाकिः वा का दित्वादिन् दर्शे। ञ्णितीति किं पानीयं दानीयं आतो युक्चिण्कृतोरिति स्यापि वृद्धेः तेन बाधित्वा चिरव दि
दिकृते पुनस्यैतोत्वान भवत्यजादित्वात् तस्या पोरिद्धेत्यपि न भवति अकृत्लादित्वादित्यादुः तेवामयमाशयः इकोऽपि ति सूत्रा
कृत्लनुवर्तते तथा च कृत्लादित्वे सति वृकिन्नेत्य यंद्वादि स्तिच् एवं च न तत्र नियोगादेशत्वादित्वमप्यत्र न भवतीति वस्तुतस्तु सूत्रापि
तासि ने हकाचित् क्षतिः सिचः कितो वा नित्य लक्षणयोग्या निषेधाद्यचो ञ्णितीति उकार् नेष्यते आशीर्लिङीति न तु लुदित्न
चिण्वद्भावप्रदात्मनेपदं स्वत्यनरस्यामिति न धाव्देशस्यापि के रूपसिद्धत्वादिनाप्रा प्रिणायाभावादितिभावः आर्धधातुके सीयु
टोत्यादिप्यपि हनो वध लिङीत्यस्यापि आर्धधातुकाधिकारादार्धधातुके हीत्यपिसमानेत्यापिङीति पदद्वयसाधारणं सीयु
टवनु आत्मनेपदमेवेति विशेषविधिश्चमसीतिभावः आहमानामिति चिण्वदिटोऽभावे हनः सिजिति कित्वादनुदात्तोपदेशेत्यनु
नासिकलोपः चिणिवधादेशस्य रत्वाच्चिण्वद्भावेन स्यादिष्वाप्तिभापंकमपविहरति न वेत्यादिना आदर्शिषानामिति नरण
इति क्तस्य निषेधादिह सिचि चिण्वदिट् सिद्धाकित्वादिति लिङ्सिचावात्मनेपदेषित्यनेन लत्वमिति अविभावेति गिरते रेफस
लत्वेषट् लत्वमिति विभाषेद्दत्यनेनवलांत्वे पदयाक्षितंवयंवेति अवचिचेति पादयानां प्रश्चेपसांडस्यप्रणांधस्यचद्वित्वेच
तुर्विंशतिः मध्य इति पंचमी यण इति षष्ठीति पक्षेवकारस्य द्वित्वेप श्वत्वारिंशत् अवचिचेति मकारस्याद्वित्वेषप्रवति ठवमाना

न॰ बो॰
उ॰ ति॰
७५

75

कर्मवदित्यर्थः लाभाद्यागादिकमेव भवति ननु द्वितीयेन भिन्नं सिद्धिः यत्र लकारवाच्यः कर्त्ता तत्रैव कर्मवत्त्वमिति व्युत्पाद
नफलमाह अत एवेति न भवतीति लकारेणैव कर्मकर्त्तुरुपस्थानात् कृत्यादीनां भवत्किनास्त्युक्तार्थनामप्रयोगात् तल्लविधेः
पूर्वं तु सुतसंज्ञास्ति लकारोपस्थापकत्वाभावेन कर्मकर्तृताभावादिति भावः अनेनेत्यंशेऽयं कृत्यक्तखलर्था इत्यत्र कृत्यग्रहणं स
नुमुचितं तस्य कर्मकर्तरि इष्टत्वात् कुसूलः स्वयमेव भिद्यते इति च स्वयमपि भिन्नो भेत्ता सकर्मकस्येति वार्त्तिके भिन्नो ग्रासः
स्वयमेवेति न तु गत्यर्थाकर्मकेत्यत्रापि वर्त्तिनकर्माणः कर्मका इति नष्टप्रकृते न प्राप्नुवन्त्यकर्मत्वान्नित्यत्वादत्तः पक्व इत्यत्र यत्ते इति
च आत्मकुः सिनाति ग्रासं सकर्मककर्तृकस्येति निष्ठातकारस्य नकारविधानसामर्थ्याद्विवक्षितकर्मणो कृत्विग्रहं हन्ते ऋष्यप्या
निष्ठातकारस्त्रनलभ्यते तेन सिनो ग्रासस्त्वयमेव भिन्नः कुसूलः स्वयमेवेत्यादि दृष्टान्तः इति अत्रेदं चिन्त्यं दुवृंति लकारवाच्यस्यैव क
र्तुः कर्मवत्कर्मणेत्यत्र वक्तृग्रहणं व्यर्थं न च कर्तुः कर्मसंज्ञायांभावे लकारो न स्यादित्युक्तमिति वाच्यं कर्मणः कर्तृत्वविवक्षायां
धातुरकर्मक इत्यकर्मकात्कर्तरीव भावे लकारस्यानिर्बाधत्वात् लकारवाच्यत्वस्य कर्मसंज्ञायामपि केवलकर्तुस्तदनभ्युपगमा
त् न हि भावे लकारः कर्त्तारं वक्ति न वाच्य लकारणाभावे कर्तुः कर्मसंज्ञायां कर्तृत्वपदे भावान्नमसे देड इत्यत्र नडहस्तु नमामि
ति यक्चिण्निषेधोपि एपनस्यादुक्तारणे कृते तु कर्तृकार्यमपि स्यादिति वाच्यं एकसंज्ञाधिकारास्यत्र संज्ञाद्वय समावेश्य इति
सिद्धेरिति ननु तुल्यतुल्यत्वं हि सादृश्यं तच्च भेदनिबन्धनं न च प्रकृते भेदोऽस्ति कर्मणः कर्तृत्वविवक्षायां कर्मस्य फलरूपक्रिया
या एव कर्तृकस्थत्वात् तयाच तत्र प्रदमसमञ्जसमिति भावः वास्तविकभेदाभावेप्यौपाधिभेदोस्तीत्याह कर्मत्वेति कर्मत्वक
र्तृत्वयोर्भेदस्ततो पाधिकं तदवस्थाभेदसमानाधिकरणं क्रियाभेदमाश्रित्येत्यर्थः एवं चावस्थाभेदेन क्रियाभेदात् क
र्मस्थक्रियातुल्यक्रियत्वं कर्तुरस्तीति भावः करणाधिकरणाभ्यामिति तुल्यक्रियः कर्त्रेत्येवानुच्यमाने असिनाछिनत्तीत्या
दावपचतीत्यादौ करणाधिकरणयोर्व्यापारस्य एव इदानीमसिः छिनत्ति स्थाली पचतीत्यादौ कर्तृस्थ इत्यतिप्रसंगः स्या
त्तन्माभूदित्यर्थः न च कर्मस्थावस्थायां विलंब्यादि रिवकरणत्वावस्थायामसिस्थाल्योर्वोयोवस्तुतः स च पि धातुनाने

राम॰
७५

नयाद्याः गोर्दुह्यते इति देवदत्तेनेति शेषः कृत्यादिषु गौर्दोग्ध्या दोहनीया पयः गोस्सुदोहा सुदोहा पयः। अजा ग्राममनेन
आनयनीया दुर्ला आहरणीया अजा ग्राममनेनायुपायः [illegible] ग्रामं गमयत इति यत् देवदत्तेनेत्यध्याहारः माणवक इति अयं प्रयोज्यः
कर्ता देवदत्तेनेति प्रयोजकस्याध्याहार्यत्वम् इति भावकर्मप्रक्रिया कर्मणा त्विति [illegible] मित्यनुषंगः प्राये
णेति एभिर्द्विर्द्वि दिग्भ्रमतयः एककर्मकास्ते अकर्मिकाः ये तु द्विकर्मिकास्ते सकर्मका इति भावः अकर्मकत्वस्य फलमाह भा
वे कर्तरि चेति भावे कर्मणे [illegible] त्याद्युक्तत्वादिति भावः द्विकर्मकेषु कर्मणः कर्तृत्वविवक्षायामुदाहरणं [illegible] माग्रो ऽमृतं स्वयं
प्रदुग्धे [illegible] इति प्रदुग्धे इत्यत्र कर्मवत्कर्मणेति [illegible] निषेधे
उद्दिष्ट [illegible] निषेधः उक्तप्रयोगानुरोधात् [illegible] कर्मणः कर्तृत्वविवक्षानमु [illegible]
हः अवेदमवधेयं अधिकरणत्वाविवक्षायां व्रजो गौणकर्मेति [illegible] व्रजो गां स्वयमेवेति भवति यदा तु व्रजस्य न कर्मत्वं तदा
मुख्यकर्मणो ऽपि कर्तृत्वविवक्षा भवति रुध्यते व्रजे गौः स्वयमेवेति तथा गोरपादानत्वविवक्षायां गोर्दुह्यते पयः स्वयमेवेत्यादि
कर्मवत्कर्मणा वत्करणं किमर्थं यथा [illegible] प्रयुज्यमाने [illegible] कर्मस्थक्रियमाणेऽपि
कर्मवदित्यर्थलाभात् सत्यं कर्मणा तुल्यक्रियः कर्ता कर्मवत् [illegible] अकर्मकव्यपदेशा
भावाद्भावे लकारो न स्यात् किं तु कर्मणि स्यात् पच्यते ओदनः [illegible] अयं प्रयोगः सिद्धान्ते इष्ट एव तत्
[illegible] पच्यते ओदनेन [illegible] इति [illegible] कर्मशब्देनात्र कर्मस्था क्रियालक्ष्यत इत्याह कर्म
स्थयेति कर्मकारकस्थयेत्यर्थः कर्त्रेति [illegible] कर्त्रीत्यनुवर्त्य प्रथमया विपरिणम्यते [illegible] तुल्य
क्रियः कर्त्रेति [illegible]
[illegible] भावे लकार इति [illegible] हितत्वादिति भावः [illegible]
[illegible] लकारवाच्यः कर्ता

त॰बो॰
उ॰ति॰
७६

76

तुल्यतया कर्त्रादिभिन्नास्यैवेयमवधिरयाद मिति नाकर्मकत्वप्रसक्तिरित्युदाहरणान्तरमाह । अजेति । ग्रामं नयतीति इह प्रति
बन्धाभावे । अकर्मकः स्यात् क्रियाफलस्याकर्तृगामित्वे व्यात्मनेपदं स्यादिति भावः । अजेति । ग्रामं नयतीति इह प्रतिबन्धाभावेऽकर्मकः स्यात्
क्रियाफलस्याकर्तृगामित्वे व्यात्मनेपदं [illegible] ननु तिष्ठाऽपि कर्मणि क्रियाकृतो विशेषो नोपलभ्यते इत्यकर्मकः स्यात् क्रियत्वं दुरूपादिति चे
न् । अत्राहुः क्रियाकृतविशेषोपलम्भानुपलम्भवदुद्देश्यतापि नियामिका सकर्मकत्वा [illegible] स्यादुद्देश्यता सा कर्मस्य क्रियाप्रयुक्तव्या
पारांश्रयस्य कर्तृस्थेति तथा हि दर्शनादेर्ग्रामादौ विषये व्यापारस्य विशेषानुपलम्भात्कर्तृत्व [illegible] अनुद्देश्यानुरोधात्तु अहं पश्यामि
मुद्देशेन त्वयं विषयो भवत्विति एवमहमपरिच्छिन्नमित्युद्देशेन तु [illegible] ऊर्ध्वदेशसंयोगानुकूलव्यापारवि
शेषउपरिगमनं तद्देवदत्तस्यैव न तु [illegible] सोपानादिभूमिः [illegible] आरोहतीत्यप्रयोगात्
अत एव हि यद्विदुपरं [illegible] इत्यर्थः । इति अत एव चारोहन्ति [illegible] कास्तानारोहयति महामात्रा इत्यादि
प्रयोगेषु [illegible] अकर्मत्वं सं [illegible] विक्लित्तिः क्रियाभवनस्य विशेषः कर्मणि [illegible] उद्देशेनैव कारकव्यापार इति क
र्मत्वात् [illegible] पच्यत ओदनः स्वयमेवेत्यकर्मवद्भावो भवत्येव [illegible] ग्रामं नयतीत्यत्रापि कर्मस्थो [illegible] संयोगस्योद्देश्य
ता नन्वत्र [illegible] कर्मवद्भावे प्राप्ते प्रतिषेधो यमाचष्टाक इति [illegible] दुहिपच्योरिति द्विकर्मकत्वादनयोरेकस्य कर्मणः कर्तृ
त्वविवक्षायामपि सकर्मकत्वान्निषेधे प्राप्ते यमारम्भः । गौः पयो दुग्धे इति कर्मवद्भावेनात्मनेपदं नित्यं गौणकर्मणि दुह्यादे
रित्युक्तत्वान्मुख्यकर्मणः कर्तृत्वे त्वविवक्षायां पयो गां दुग्धे इति नोदाहृतमपि साधु । एवं च प्रधानेनीहृकृषवहामित्युक्तत्वात्तुल्य
न्यायेन न्यादीनां मुख्यकर्मण एव कर्तृत्वविवक्षेति फलितं । [illegible] कर्म [illegible] इत्यत एते [illegible] अनुवर्तते दीपजने ।
ततोऽन्यतरस्यामिति तदाह अजं नादित्यादि [illegible] अभेदि काष्ठमित्यत्र नित्यं चिण् अकर्मकर्तरि किं अकारि घटः कुलाले
नाऽपि नित्यमेव दुहश्च कर्मकर्तरि स्येव अदोहि गौर्गोपालेनेत्यत्र तु नित्यं उदुम्बरः फलमिति कालः उदुम्बरं फलं पचती
ति स्थिते गौणकर्मणः उदुम्बरस्य कर्तृत्वविवक्षायामिहाकर्मवद्भावः ननु द्विकर्मकेषु पचेरपाठात्कथमिति यद्वदन्ति ते

राम॰
७६

पात्तः इति कथमतिप्रसंग। इति वाच्यं स्पादस्य प्रतियोगिक्रियाया धात्वात्त्वेनाविशेषितत्वात् नस्येतस्मिन्स्तत्रेयात्यात्तक्रितुल्य
क्रियश्चत्के मात्सिये नातिप्रसंगो न भवेत् न तु तुल्यक्रियः कर्त्ता कर्मवद्भवतीत्युक्ते केनेत्याकांक्षायामनेककारकोपस्थितावपि क
र्मवदिति मत्या सत्या कर्मणेति लभ्य एवेत्यत आह किंचेति आधिगच्छतीत्यादिश्लोकस्यार्थो नुयात्तूपावपातस्तस्मैनमोस्तु गुरवे सद
नत्तुफलं व्यापारश्च धात्वर्थः स एव क्रियापदवाच्यस्तत्र व्यापाराश्रयः कर्त्ता फलाश्रयस्तु कर्म एवं च पचिभिदिप्रभृतीनां च सक
र्मत्वे फलस्य कर्मविशिष्टत्वे च तुल्ये कर्त्तुस्य भावका गम्यादय इति कथं ज्ञातव्या इत्यत आह यत्र कर्मणीति आत्मनेपदीति आह हागा
त्रद्ह स्त्रिषु आधिगता न धिगतपा स्वार्थे धित्यादा चापि वे लक्षणेनोपलभ्यत इति बोध्यं करिष्यत इति स्पासिच् सीयुडि तिवैकल्पि
कश्चि एवदिट्पदे त्र... नोस्य इति इट् करिष्यते एवेत्यादि अकरिष्यत् अकरिष्यत सिच् अश्चि एवदिटि अकारि एषक्तेत्र तसी
युटश्चि एवदिट् कारि षीष्ट पदे हनीष्ट लामितु कारिता कर्त्तापह्निणोस्तु क्रियते घरः स्वयमेव अकारीत्यादि गेतत्तिष्ठादिति क
र्मवत्कर्मणेति कर्मवत्त्वं न सिध्येदित्यर्थः एतेन पचति पाकं करोतीति विकरणदानात् स्यात्ते पाकिरिति नैयायिकोक्तिः परा
स्ता करोतेर्यत्नार्थत्वे कयतत इति वत्सकर्मता पि न स्यादिति एतेनेति तत्र स्यकर्तृस्य त्वाभ्युपगमेनेत्यर्थः यगभावादि
ति एतिलुप्य त्वनु त्वं सोयमनाइति स्यादि तिभावः ओलोपेति ओ तः स्यतीत्यनेन तु कर्मवत्त्वाभावेकयमिद्वानजित्सतआ
ह तात्यादीत्यादाविति नत्वेति एवं नच नभवतीत्यर्थः देवदत्त यज्ञदत्ताव नोन्यं स्पृशत इत्यत्र तयोरेव कर्मत्वं कर्तृत्वं चास्तीति कर्मस्थक्रि
यायाः कर्तृस्थत्वात् कर्मवद्भाव मा प्रसंगकात् सकर्मकाणामिति नन्वत्र देवदत्तो यज्ञदत्तं स्पृशति यज्ञदत्तस्तु देवदत्तमिति क्रियाभे
दोऽवगम्यमानत्वात् तथाच स्वनिष्ठां क्रियां प्रति कर्तृत्वं भिन्नक्रियां प्रति तु कर्मत्वं भवति अथ द्वयोरपि कर्तृत्वमेव स्यादिमो
गोगांस्पृश इत्यत्र यथा एवंच कर्मस्थाक्रियायाः कर्तृस्थत्वाभावात् कर्मवद्भावो नप्राप्नोति नच संयोगस्याद्विष्ठत्वात् कर्मस्य फलस्य
कर्तृस्थत्वमस्त्येवेति वाच्यं तत्र निरुपितसंयोगस्याभिमतत्वात् अन्यथा फलव्यापारयोरैकाश्रयत्वे सकर्मकत्वेन न लभ्येत किंचकर्मा
गयोः कर्तृस्थ नियतत्वात्तारोहति हस्तीगच्छति ग्राममित्यत्र कर्मवद्भावो नेति भाष्यकैयटादिसंमतं तथाच संयोगरूपफलस्य सर्वत्र

लं°बो°
उ°लि°
७७

तस्मिन्नेव विषये इति भावः । न गिरा गिर इति ॥ इत्यादेरं कृतोऽयमित्यत्र गिरा वंदं प्रति विधेय एव पदं विधीयमानं गिरा पदस्यान एव यन्ने
भवत्येव मिहापि यकः प्रतिषेधं कृत्वा विधीयमानः स्यन् लटो येष्वा न एव भवति अतो व्याचष्टे । गम् वियेतु नास्येति स्यन्नासन्निये
गापि हं परस्मैपदं स्यन भाविन भवतीत्यात्मनेपदमेवोदाहरति कोविधीयेति कोविद्युत्कुषे अकोधि अकोविधास्त्र स्मते र रंजे
अरंजि अरंस्यतेत्याद्यपि शेषं स्यन्स्त्रो कल्पंतीत्यत्र नित्यं नुम् यकस्तोतु आख्यीन घो रिति विकल्पः स्वरे विषये बोध्यास्तेव रहमक
रणेषि घते काएं स्वयमेवेति हस्यादो इति कर्मकर्मकर्तृप्रक्रिया ॥ अभिज्ञावचने ऌट् ॥ स्मापिक्रियते अनद्यतने लङ् इत्यतोऽनद्यतन इति
वर्तते ऽभिज्ञास्मृति साउच्यते बोध्यते नेनेति विग्रहः तदाह स्मृतिबोधिनेत्यादि । वत्स्याम इति अवसामेत्यर्थः पदप्रयोगो थोव सौ
त्रवाक्यार्थस्तु पमगकर्तृत्वकथा वनमिव स्मरसीत्यत्र गोकुलाधिवासकर्मकं कृष्णसंबोध्यकस्मरणमिति फलितोऽर्थः । न यदि ऌटः
प्रतिषेधेऽत्सर्गो लङ् वासो लक्षणमिति प्रसिद्धत्वाज्ज्ञापकमित्यर्थः । चारणं लक्ष्यमिति सह साधुष्प नारीह्याह्याष्पं पचेल ऌति वने
वसाम गा अचारयाम यच्छब्दयोगे पीति अतएव न यदीतियोगात्पूर्वं विभाषा सांकांक्ष इति न कृतमिति भावः । आत्यंतापन्न इति
आपन्नबोपलाभस्तत्र आसंकत्वं नामेयं यदभियुक्तः स्तकेलोप्प पङ्क्तिः नाहमित्यादि कलिंगो नाम निषिद्धो देशः अंगवंगकलिं
गेषु सौराष्ट्र मगधेषु च तीर्थयात्रां विना गत्वा पुनः संस्कारमर्हतीति स्मरणात् तस्मिन्देशे त्वमागत्वा चिरं स्थितमिति केन चित्कथि
उतृउक्तः सन्नाह नाहं कलिंगान् जगामेति न केवलं स्थानमेव निषिध्यते किं तर्हि तदेतुभूतगमनमपीति भवत्यंतापन्नवः य
दालु कलिंगे षगम इत्युक्तः सन्नलमनमेवापलपति न तदाः त्यंतापन्न व इति लङेव भवति न कलिंगे षगच्छमिति प्रश्नेच भू
तानद्यतनपरोक्षे इति वर्तते प्रश्न इत्यत्र कर्मणि नङ् त्याह प्रष्टव्य इति आसन्नेति पंचवर्षाभ्यंतरमासन्नकालं पंचवर्षातीतं
तु विप्रकृष्टकालमित्याहु प्रष्टुमानइति आसन्नकालिके भूतानद्यतनपरोक्षार्थवृत्तिधातवर्थे ऌट् वये संतीत्यर्थः प्रश्ने किं भूता
नद्यतनपरोक्षे लिडेव जगाम चैत्रः लड्स्मे स्मेतयोयंभूतकालद्योतकं ननौप्रश्न स्यप्रतिवचनमिति विग्रहः समाहारद्वंद्वे तु उभ
यत्रास्यादित्यते च प्रतिवचनएवलट् तदाह ननु करोमीति न च पृष्ट इत्यहणं व्यर्थं यावता प्रश्नपूर्वकमेव प्रतिवचनं भवती

राम°
७७

यामयं ग्रन्थः कं पचेत्संगच्छत इति चेत् अत्राहुः उदुम्बरः फलं पचतीत्यत्र कर्मवत्कर्मणेत्यस्य प्राप्तौ दुहिपच्योरित्यनेन कर्मवद्भावो
बहुलं तिपि यले सकर्मकयोरिति वेति न काप्यनुपपत्तिरिति सकर्मकयोः पचं तु पचनो नित्यमाद्युदात्तो धयं यकि तु लास्वनुदात्तेत्वा
दिना लसार्वधातुकानुदात्तत्वे कृते यक उदात्तत्वं प्रयुज्यते प्रमोप्यन्न इति अभ्यायक्ते कर्तरि तु पगेव भवा कर्मेति कर्मे पादः क्रिया
वाचीत्याह भवा वाक्यवाचीति अन्यत्रेति आत्मनेपदादन्यस्य निषेध आत्मनेपदमेव भवतीत्यर्थस्तदेतदाह यक्चिणोरिति
अवाकीष्टेति लिङ् सिचोरितिटेत् आदित्यन इति लुङादित्वात्केङि राय लिङ् त्विति रिङियङ् आदन्तेति उर्श्वेति कि
त्वं ह्रस्वादंगात्क्षितिसि चोलोपः न रुधः चिण्मपदं इत्यत्र अच्चि अनुवर्तते अचः कर्मकर्तरीत्यतोऽनुवर्तनादाह कर्मकर्तर्येवे
ति अत्र नेति तपस्तापस इत्यनु व्यज्यते नदुहस्नुनोः पिपयमिति न स्रोते तपिक्रिकर्मकत्वात्तेनाकर्मणः कर्तृत्वविवक्षा
यामपि पयोऽन्यकर्मणो विद्यमानत्वात्सकर्मकत्वं पातिषेधइतिनिषेधेन यक्चिणोः प्राप्तिरेव नास्तीति चेत् अत्राहुः तस्या
दियोगेन दीप्यमवणानुकूलाउक्तं कास्तु पातोऽर्थः सावमोनि दास्तु मश्रवण इत्यत्रापि करले त्युरपस्य पतेऽन्ने नेति
प्रश्यद्यणं सा चोक्तं कास्तयं मदुग्धे अस्यगुणे रूपश्यतात्तथयमानस्याह निमेदिनीति प्रयोगेउपत्तुनाउक्तं द्विलेत्यर्थः
वस्रोगं मस्रोतिउक्तंऽय ति अंलभोविलगणपोः नस्रोतेः गोः कर्तृत्वविवक्षायां प्रस्नुते गौरिति पास्नाविरेति चिण
वदिट् न चा चिणिनिषेधे चिण्वदिड्विकल्पस्याप्रसक्तिरिति णंकच्चिण्वदित्यनेन हिंचिणीव कायम तिदित्यतेनचविणनेयुक्ता
लोतिदेशोनिषेधंयाक्राते येनचिण्वदिटो निषेधः स्यात् पास्नोऽहेति स्नुकर्मभेरयात्मनेपदम् निमित्त इति नियमा फलादि
लक्षण इत्यत्र नमलेदंड इति इह नमितान नमितयोर्विशेषदर्शनादुदृग्य तु रोधे अकर्मस्यनिकियत्त्वमस्ति कर्मस्थां णस्यनमु
नस्य दुहेर्य्यलात्र तुरहनुकूलव्यापारस्येति कर्मवद्भावस्य प्राप्तिरस्तीति भावः अचीकरतेति चिणमति चिङे णिश्री
तिचङ्णि अंधीनि तेः सामान्य ग्रहणस्य फलमाह उपमुदस्यतीत्यादिषु अंडेतिलिङ्आत्मनेपदविधेयोः कर्म
कस्तमुदाहरति विकुर्वते सैंधवा इति कुपिरतोः नदुहस्नुनमामित्यतो नेति वर्त्तते तदाह नयणीति किं तु स्यन्निति

म. को.
उ. ति
७८

78

ऽद्यतनभूते यत्स्थलीपुलस्ताप्रस्थेदादि उक्तं तत्रातिनिर्दिश्यते एवं कदागमिष्यतीति भविष्यत् कालेन प्रश्नवाक्यं गच्छामीत्युदा
हरणे भविष्यत्कालाभिव्यक्तये एष इति प्रयोगस्तु इदमीमे वगमिष्यामीति वर्त्तमानसमीपभविष्यत्कालद्योतनाय तेन द्वित
मा नाविनाभूतमदूपरिकरबंधादि उक्तं तत्रातिनिर्दिश्यते तेन च कदेति प्रश्नोत्तरवाक्ययोः कालाउपादानादसंगतिः शं
क्या उत्तरत्राय मेव पाल्हाप्यामिदानीमिति कालावगमात् सामीप्ये किं कदा आगतो भवान् अयमासापूर्वस्मिन्मासे आगतं
एतच्च सूत्रमाकरे प्रत्याख्यातं गंगासमीपे गंगात्वारोपवद्वर्त्तमानसामीप्ये वर्त्तमानत्वारोपसंभवात् आशंसायां आशंसनमाशं
साऽप्राप्तस्य प्राप्तुमिच्छा आशंसायां वर्त्तमानत्वेपि तद्विषयस्य वर्षादेर्भविष्यत्कालसंबंधाद्भविष्यतीत्युक्तं आशंसायां किं
गमिष्यति क्षिप्रवचने वचनग्रहणं स्वरूपग्रहणनिरासार्थं तद्वाद् क्षिप्रपर्यायइति पूर्वविषयेइति आशंसायामित्यर्थः तेन पूर्व
लक्षणापवादोऽयं आशंसावचने भूतवद्वर्त्तमानवत्प्रत्ययोरपवादः नभूतवदिति नवर्त्तमानवदित्यपि बोध्यं आशंसे अध्य
यीयेति एवं प्रार्थये अधीयीय इच्छामो वयमधीमहीत्यादि ज्ञेयं क्षिप्रमिति क्षिप्रयोगेपि परत्वाल्लिङ् इति भावः नानद्यतनभू
तानद्यतने लङ् द्विः भूते भविष्यत्यनद्यतने लुङ्लुटौ चानयोरर्थयोर्निषेधेनेतदाह लङ्लुटौ नेति एवं च भूते लङ् भविष्यति लु
ट् इत्याशयेनोदाहरति अरात्सीत्यादि अभिनिति आहवनीयादीन् भविष्यति मर्यादायामिति क्रियाप्रबंधार्थमसामी
प्यार्थे चेदं वचनं नानद्यतनवदित्यनुवर्त्तते इत्याह अनद्यतनवन्नेति लुडन्नेत्यर्थः इह सूत्रे देशकृता मर्यादा उत्तरत्र काल
कृता तत्र विषयं वक्ष्यति तस्य परवस्मिन्निति पाटलिपुत्राद् अवधेर्मार्गस्य यदवरं कौशांब्याः सकाशादित्यर्थः कौशांब्याः पूर्वस्मि
न्यावत् भविष्यति किं योऽध्वाऽतिक्रांत आपाटलिपुत्रात्तस्य यदवरं कौशांब्यास्तत्र सक्तून्पिबाम मर्यादावचने इति किं यो
ऽध्वायं गंतव्यो निरवधिकस्तस्य यदवरं कौशांब्यास्तत्र सक्तून्पातास्मः अवरस्मिन्निति किं योध्वा गंतव्य आपाटलिपुत्रा
त्तस्य यत्परं कौशांब्यास्तत्र सक्तून्पातास्मः कालविभागे च कालविभागः कालविशेषः अनहोरात्राणामिति संबंधे षष्ठी
पूर्वसूत्रमिति तदयमर्थः मर्यादोक्तौ कालविभागे कालविशेषाद्यदवरं तस्मिन्विभागे भविष्यत्यनद्यतनवन्नास्ति चेत्का

राम
७८

तिवाच्यं विरुद्धमिति वचनं प्रतिवचनं वचनाभिमुख्यमापि प्रतिवचनमिति तस्य ग्रहणं कर्त्तव्यमिति किं यदेष्यित्तत्वात् नन्वोः भू
त इत्येव पदे लुङ् अनद्यतने तु लङ् पक्षे यथा प्राप्तमिति लुङ्लङोरभावपक्षे लङ्परोक्षे तु लिडित्यर्थः भविष्यतीति भविष्यति ग
म्योदय इति सूत्रात् यावत्पुरा लक्षणयति पदोरूपविभाषाः निपातेति निपातस्य ग्रहणे नञा प्रयुक्ते यावद्भुंक्ते इति निर्देशेन भोक्ष्यते इत्य
र्थः यावद्दास्यते इति अनद्यतनभविष्यति लुटा यावद्दाता तावद्भोक्तेति प्रत्युदाहर्त्तव्यं विभाषा न नन्वनद्यतने हि लट्स्य स्यामि
ति नद्यतने विभाषा हि लिङ्हि लट्स्यस्य कर्हियोगे तु अनद्यतनावगतिर्लक्षणमेवेति भोक्ता वेति ननु भविष्यत्सामान्ये ऽदयं लङ् हि
हि लट्स्य लुङासद्वत्वेवं विकल्पो विषयमेवादिति चेत् अत्राहुः अनद्यतने लुङ् त्यत्र विभाषा कदेत्यादीनि कानिचित् सूत्रा
णि इष्टानुरोधेनानुवर्त्तिन लुटविषयेपि लड्भवति नत्वनद्यतने लुटा लङ्बाध्यात इति किं तर्हि किमा हर्त्तं किं वर्त्तं किं वर्त्तं के
चित्तु यद्यपि कदा कुत्वेत्यादयपि किंवृत्तं लप्यापि तन्लग्रहणे ते अनभिधानात् तेन कदा भोजयिष्यसीत्यादौ भविष्यतीत्यण् नेत्या
लिप्सायाम् लिप्स्यमानसिद्धौ लिप्सायाः सत्वात्पूर्वेण सिद्धे यत्किंवृत्तार्थमिदमिति निष्प्रयत्नंदाहरति योऽन्नमिति लोडर्थो लो
डर्थस्य लक्षणमिति यद्यपि लस्य रूपः रूपं भोजनं लोडर्थस्य गोचारणे प्रयस्य लक्षणं भोजनकाले गोचारणं त्वया कर्त्तव्यमित्यर्थः
पदेशे ति लस्वेडो तस्येवं प्रेत्यं गाप्यारयेत्यर्थः लिंगो बो कालादुक्त्र तदिति तार्थे स्तरपदस्य दिक्छे त्वेत्यनुवर्त्त
नादिह समासो इदुर्लभ इत्याशंकायामाह निमित्तवादिति वर्त्तमानसामीप्ये प्राप्तेति तस्मादेसामीप्य इति निर्देशात् प्राप्ति सिद्धे
चल्तर्वर्णादिष्य इनिवार्मितं प्रपंचार्थमित्याहुः नचात्र प्र णगुणे निषेधात् सर्वसमासो नप्राप्नोतीति वाच्यं अनेनेव निर्देश
नतन्निषेधस्यानित्यत्वाद्भागमात्लेन बुद्धिमात्रमिकादिसिद्धं येनोपाधिनेति धातुविशेषापुत्राधिना तद्यथादिं षडुपजोः प्रानन्त्रि
द्धितस्य तामामेव धातुपभवति ननु धात्वंतरात् तद्धो लादिवि पि एकर्त्तविचलं नित्या रम्भआज भासेति याबदि मुजाद
यद्वकालेपि कृत्वा दिश्यो धातुभ्य स्तासिंस्त सिंनुपापोभत्येवमवं दि कदाऽगतोसीति भूतकालेन प्रश्नवाक्ये आगच्छामीत्यु
दाहरणे भूतकालाभिव्यक्तये अयमिति प्रयोगस्त्विदानीमेवागतमिति वर्त्तमानसमीप भूतकाल द्योतनाय तेन स्यागमनाः

न.बो.
उ.नि.
७९

79

भावः प्राग्वदिति क्रियातिपत्तौ भविष्यति नित्यं लृङ् भूते वेत्यर्थः अनवक्लृप्त्यमर्षयोः लिङ्लृटावनुवर्त्तेते तौ च कालत्रयेऽभवन्तस्तेन
सर्वलकाराणामपवादौ किंवृत्तस्यानधिकाराद्द्वाविह योगावुभयोर्भिन्नार्थत्वात् किंवृत्ते योगे नित्यं कर्त्तव्यं एवं निपाता ईष्यात्याच: परनि
पातो यथासंख्यमित्यर्थः लङ् प्राग्वदिति भूते वा भविष्यति नित्यमित्यर्थः न संभावयामि न श्रद्दधे त्वं हरिं निन्द्यादित्यादुदाहर्त्तव्यं
किंकिलास्त्यर्थेषु लृट् लिङ्लृटोः प्राप्तयोरिह लृडेव लिङ्निवर्त्तते इत्याशये नाह लिङोऽपवाद इति अस्ति भवतीति त्वत्कर्त्तृकं
स्वर्गगमनमस्तीत्यादिरर्थः लृडनेति लिङो निरस्तत्वेन तन्निमित्तत्वाभावात् जातुयदोर्लिङ् अनवक्लृप्त्यमर्षयोरिति निवृत्ते
तथा च अनवक्लृप्त्यमर्षयोरिति लिङ्लृटोः प्राप्तयोर्वचनमिदं लृटो बाधे बाधे तदाह लृटोऽपवाद इति अयं कालत्रये लङ् प्राग्व
दिति क्रियातिपत्तौ भूते वा भविष्यति नित्यमित्यर्थः जातु भवान् हरिं निन्द्यादित्यादुदाहर्त्तव्यं गर्हायामिदं गर्हायां च जातु
योगे लङ् यच्चयत्रयोः अनवक्लृप्त्यमर्षयोरिति निवृत्ते यथासंख्यमिह नेष्यते अयमपि लिङ्लृटोऽपवादः योगविभागस्तु
उत्तरसूत्रद्वये [illegible] यच्चयत्रयोरेवानुवृत्तिर्यथा स्यादित्यर्थः क्रियातिपत्तौ लृङ् प्राग्वत् यच्च यत्र वा त्वमेवं कुर्याः नमर्षयामि इत्यादि गर्हायां च कालत्रयेऽभवतीति सर्वलकारापवादः लिङेव स्यादिति गर्हायां विभाषां कथमीति लट् प्राप्तस्तं बाधित्वा
इति लृट् च प्राप्तयोरपवादोऽयं यच्चयत्रयोर्योगे विहितो यं लिङ् विभाषः लृङ् प्राग्वत् यच्च यत्र वा त्वं शूद्रं याजयिष्यसि त्वदन्याय्य
मित्यादि चित्रीकरणे च अयमपि कालत्रये लृङ् प्राग्वत् यच्च यत्र वा त्वं शूद्रं याजयिष्यसि आश्चर्यमेतत् एषोऽपि सर्वलकारापवादः
शेषेऽपि योगेनेति यच्चयत्रयोरुपसंख्यानाज्जातुयदोरिति लिङ् लङ् निमित्ताभावादिह लृङ् न उताप्योः समर्थयोर्लिङ् स्यात् कालत्रये भूते
पि नित्यमनिवात्र ग्रहणस्यानिवृत्तत्वाद्भविष्यतीव भूतेऽपि नित्यं लृङ् उत अप्याहन्यादुत राजा नहनिष्यतीति गम्यते कामप्रवेद
ने लिङ् स्यादिति कालत्रये सर्वलकारापवादः कच्चिज्जीवति ति कामो मे इत्यनुषंजनीयम् वर्त्तमानसामीप्य इति लट् संभावने
लमिति शिष्टे पर्याप्तमित्यर्थः प्रथमयासप्तम्याचेति संभावनेऽलमिति सप्तम्यर्थं प्रथमयाविपरिणमते अलमिति प्रयमं सं
सप्तमेति संबंधः संभावनेऽर्थे इति न च प्रथमया विपरिणामितत्वात्कथमन्तरसप्तम्यर्थलाभ इति चेत् आत्राङ् संभावनेऽलमि

राम.
७९

लविभागस्याहोरात्रसंबंधीनचेदित्यर्थः इह कालविभागे सत्यवरस्मिन् अनद्यतनवच्चेत्युक्तेः कस्मादित्यपेक्षायामर्थात् का
लविशेषादिति लभ्यत इत्येके केचित्तु कालविभाग इति पंचम्यर्थे सप्तमीत्याहुः उत्तरार्थमिति परस्मिन्विभाषेति सूत्रे कालमर्यादा
या एवानुवृत्तिर्यथा स्यात् भविष्यतीति यः संवत्सरोऽतीतस्तस्य यदवरं मासास्तत्र पयोपि वा मर्यादायामिति किं यो निरवधिस्समय
स्तस्य यदवरं मासास्तत्र पयः पातास्मः पंचदशरात्र इति नन्वत्र संख्यापूर्वं रात्रमिति क्लीबत्वेन भाव्यं न च पंचदशरात्रो यस्मिन्
पक्ष इति बहुव्रीह्याश्रयणात् पुंल्लिंगः सिद्ध इति वाच्यं अहःसर्वैकदेशेत्यच्प्रत्ययस्यासंभवप्रसंगादिति चेत् सत्यं अत
एव हि भाष्यप्रयोगात् क्लीबत्वं नेत्याहुः परस्मिन्भविष्यत्यनद्यतनवच्चेति विकल्पेन निषिध्यते वर्जमिति णिजंतादचोयदिति कर्म
णि यत् वर्ज्यमिति पाठे तु द्वितीयायां चेति णमुल् अनहोरात्राणामित्येव योयं वत्सर आगामी तस्य यदवरं पंचदशरात्रात् तत्र पयः
पातास्मः इत्यादि लिङ्निमित्ते अतिपत्तिरनिष्पत्तिः भूते च लिङ्निमित्ते लुङ् स्यात् भूते भविष्यति च क्रियातिपत्तौ यद्यनेनाप
तनसाधारणं भूतसामान्यमिह ज्ञेयं अस्योदाहरणानि ताभ्यामन्यत्रोण्लिङ इत्यारभ्य समानकर्तृकेषु तुमुनिति विहाय सप्त
स्वपि बोध्यानि ततः प्राचीनेषु चोताप्योरित्यनेन विकल्पोक्तेः लङ्चेति लङ्निमित्ते भूत एवायं विकल्पो भविष्यति तु नित्यमेव ल
ङ् गर्हायां अत्रवोताप्योरिति निवृत्ते वर्तमाने लट् केः कालत्रयेऽनुवर्तमाने इति विधिरयं कालत्रय इति कालविशेषानुपा
दानादिति भावः परत्वादिति निरवकाशत्वादित्यपि बोध्यं अपिजायापामिति स स सि अत्याक्षीदित्यादिविषयेपि त्यजसीत्या
दिलङो न प्रयुज्यत इति भावः एवं योजापां तत्याज त्यजत् अत्याक्षीत् त्यक्ता त्यक्ष्यतीत्यादिविषयेपि योजापामपि त्यजति
जातु गर्हिकामाधत्ते इति लङ्देवकालत्रयलकारापवादः तथा प्रयोजकः लिङ्निमित्ताभावादिह क्रियातिपत्तौ लङ् न भव
ति कालत्रयलकारा इति परोक्षानद्यतनभूते लिट् कथं धर्मं तत्याज भूतानद्यतने लङ् कथं धर्ममत्यजः भूतसामान्ये लुङ् अत्या
क्षीः भविष्यत्यनद्यतने लुट् त्यक्तासि भविष्यत्सामान्ये लृट् कथं धर्मं त्यक्ष्यसीत्यादि अत्रैति क्रियातिपत्तावितिज्ञेयं किंवृत्ते
लिङ्लोटौ कालत्रयेऽस्तः नानुवर्तत इति एवं चास्मिन्विषये निंदति निंदिष्यत्यनिंदद्विति कालत्रये लकाराः पक्षे न भवंतीति

ल.बो.
उ.लि.
८०

80

देशेषु उपदेशु धातोरेतौ स्तः अर्वे लकाराणामपवादः। लिङ्चेत्यनेन समानकर्तृकेषु लिङो विधानादिह लिङ्लोटाव समान
कर्तृकेषु भवतः इति बोध्यं। इच्छन् करोतीति। आचानभिधानात् समानकर्तृकेष्विति तुमुन् न तु काममवेदने कच्चितीस ने
ने व लिङ् सिद्धत्वादिह लिङ्ग्रहणं मास्तु लोडेव विधीयतां इति चेन्न लोटो लिङो बाधा माभूदिति लिङ्ग्रहणं स्यादनुकर्षणाय
सत्याल्लकारां लरमपि स्यादिति न चैवमपि काममवेदने इत्युपसंख्यानेनैव सिद्धकाममवेदने कच्चितीति सूत्रं मास्त्विति वा
च्यं यच्चार्थ्यं प्रकरणादिना काममवेदनं गम्यते इच्छार्थमुपपदं नास्ति तदर्थं तदारंभात्। लिङ्च समानकर्तृकेषु तुमुन्नित्यनेन इ
च्छार्थेषु लिङ्लोटाविति विहितयो लिङ्लोटोर्बाधे प्राप्ते लिङ्। भसिभसवार्थे स्यं न चात्र वासरूपविधिना लिङ्लोटोर्नित्यं बा
धा नेति वाच्यं तत्प्रत्ययुतुमुन्वदलर्थेषु तदभावात्। अथापि वासरूपविधिः स्यादेवमपि लिङेव मध्यास्यात् लोण्माभूत् इत्येवम
र्थो लदारंभं व्यर्थमेवान्यियातिपत्तौ लृङ्प्राग्वत्। इच्छार्थेभ्यो इच्छार्थेभ्यः किंपचतिगच्छति प्रैषातिसर्गप्रैषो विधिरिति विधिग्रहणं
कर्तव्ये प्रैषग्रहणं शिष्टव्यवहारार्थमित्याहुः। लोडनुकर्षणमिति लोट् इति योगस्येदमेव प्रयोजनमेकयोगत्वे तु लिङोप्यनु
कर्षणं स्यात् प्राप्तकालार्थमिति प्रैषातिसर्गयोः पूर्वेणैव सिद्धत्वादितिभावः। लिङ्चोर्ध्वे प्राप्तकालविशेषे प्राप्ते लिङो विधाना
र्थमिदं सूत्रं प्रैषातिसर्गयोस्तु पूर्वेण प्राप्तएव लिङ्लोटकृत्यानां कालविशेषेऽस्मिन् लिङा बाधा माभूदिति चकारः पूर्वसूत्र
विषये इति प्रैषादय ऊर्ध्वमौहूर्तिके इति वानुवर्त्तत इति अधीष्टे लिङोऽपवादः योगविभागस्तु ऊर्ध्वमौहूर्तिकानन्तु
वृत्त्यर्थः। लिङ्यदि कालसमयवेलासु चेति उपपदाष्विति वचनविपरिणामेन स्पष्टार्थं लतुमुनोपवादः यजनीते नियत्का
लः पचतीत्यत्र तु न प्रैषादीनामनुवृत्तेः। अर्हे योग्ये कर्तरि गम्यमाने कृत्यचतृचो भवति त्वया कन्या वोढव्याः वहनीया
त्वं कन्यां वोढा कन्यां वहेरिति कन्यावहने योग्यस्त्वमित्यर्थः। नन्वर्हे किमर्थं कृत्यतृचो विधीयते यावता सामान्येनैव विहितत्वा
दर्हेपि भविष्यतीति चेत्। अत्राहुः। अर्हतायां योत्यायाम प्राप्ताल्लिङ् विधीयते तेन तु लिङा बाधा माभूदिति कृत्यतृचो वि
धानं न च वासरूपविधिना समावहीत सिद्धिः स्त्र्यधिकारादूर्ध्वं तदप्रवृत्तेरिति धातुसंबंधे इह धातो विशेषणविशेष्यभा

राम।
८०

त्यावस्यै द्वितीयस्यैव विपरिणामात् सर्वेषु स्मिन्निति संभावनं क्रियासु योग्यताऽध्यवसायः। अलमितीति तत्त्व संभावनं समर्थ इ
ति चेत् भवति तदा लिङ् स्यादित्यर्थः। सिद्धेति सिद्धः अप्रयोगो यस्य तत्र सिद्धे अलमिति सति प्रयोगो न हि शब्दो न प्रयुज्यते तदर्थस्तु गम्यते तत्रेति
फलितोर्थः। मनोरमायां त्वलमिति संभावने सिद्धाप्रयोगश्चेदिति सूत्रयित्वा मुचितमिति स्फुटं तत्र सिद्धस्याप्रयोग इति विग्रहः। कस्याप्र
योग इत्याकांक्षायामिष्टादलं पदस्येति बोध्यं। अपि गिरिं शिरसा भिन्द्यादिति संभावनोदीलकोपिशाचः गिरिं विदारणे पर्याप्त इति संभावनात्र गम्यते
कालसामान्ये यं लिङ् लट् भावलट् अपि गिरिं शिरसाऽभेत्स्यत् अलमिति चेत् किं पायेण गमिष्यति विभाषा धातौ संभावनमुच्यते
येन तत्संभावनवचनं तस्मिन् धातौ संभावनार्थकधातावित्यर्थः। भुंजीत भवानिति अत्र पूर्वेण नित्यो लिङ्। धातौ किं संभावनवच
नस्वरूपग्रहणं माभूत् अलं तु संभावनवचने तकाचक धातोरप्रयोगादिह विभाषा न भवति भुंजीत भवान् पूर्वेणात्र नित्यो लिङ्। हेतु
हेतु विभाषेत्यस्यानुवर्तनादाह वाक्यादिति न मेच्चेदिति कृष्णनतिः सुखप्राप्तेर्हेतुः भविष्यत्येवेति लिङित्यनुवर्तमाने पुन
लिङ्ग्रहणं विधिपपतिपत्त्यर्थमिति भावः। हंतीत्यादिनलक्षणहेतोः क्रियाया इति हेतोः शतृप्रत्ययः स्यात् हननस्य पलाय
नहेतुत्वात् मेवं देवत्रातो गतो गत्याह। इति योगे वस्फुरितिः मिथ तेन विभाषेत्यने गवात्र सा शिलं चलइति पा छोरन्यतरस्यामि
ति सूत्रे भाष्ये व्यवस्थापितत्वात् त्सात्याच कैयटेन तत्रैव सूत्रे देवत्रात इति संज्ञात तत्र नुद्गतिं दो द्रा प्राहीयो अन्यतरस्यामि
तित्वं न भवति देवत्राण इति किं तु देवत्रात इत्येवा शोयदि अन्वि दिभाष्येति पातप गेलत्वं गतुः विषवाचके गर इत्यत्र न
भवति विभाषा गहण इति मत्वयो जलचरे भवतीत्याह: ज्योतिष्विन ग्रहः लक्षणहेत्वोरिति सूत्रे न चो विभाषेत्यतो विभाषे
त्यनुवर्त्य व्यवस्थितविभाषाः आयता दितिणत् प्रयोगेभ्र दिधिः शतृशानचौ न भवतः हंतीति पलायते चालवने गवा
तः अनात्र न त्वचद न भवति गोत्रः संपितं चलत इति बहुव्रीहि तथा छोरन्यतरस्यामिति संज्ञात्र इति दत्त विकल्पो न भवति
अन्यत्र तु मातापितरः लोपश्चैतन्नत्वादिविधयो मिथः परस्परमेकविषये न विकल्पं मेलतः क्रियाय कसूत्रे व्यवस्थितविभा
षाश्रयणादिति भावः। क्रियातिपत्तौ तु भूते भविष्यति च नित्यं लङ् यद्यवधि २ — लभस मुस्यत्स्यत इच्छार्थेषु लिङ्लोटौ

नुनडुक्तरीत्यालभ्यत इति दिक् ननु लक्तद्धि यिवाकेरेव स्वविषये भत्यथाः किं श्रा: किमनेन सूत्रेणेत्यत आह यत्र काल इति वर्त्तमान
सामीप्य इत्यारभ्य कालान्यत्वं प्राप्येण प्रति पाद्यते तदेव चेद्भूत्वत इति भावः वर्त्तमाने एवाह्यन् यथा विद्यादौ वर्त्तमानभूतकालान्यत्वं
भत्य ये भुक्तो वा स्वकालात् प्रच्युतो भवतीति शंकां ज्ञायामाह लिङ् तत्रापीति यथा नानुतेये न गुणस्य न यन सुचितं न तु विपरीतमि
ति भावः भत्य या इति कालांतरभोजी भवतीत्यर्थः भूते लडिति एवं उपवादादर्थः अतीतेति अतीतवासकर्तायस्य दर्शनस्ये
ति वहुव्रीहिः सोमयाजीति करणे यज इति भविष्यति णिनिः अत एवाह सोमेन यक्ष्यमाण इति एवं च यद्यन् यथा विचरह शोभ्रते लट्
● इष्टा यथावित्यर्थः इत्यादावपि स्यादेतत् भाविकृत्यमासीदित्यत्र सूत्रशेषाभावविशब्दस्य भूतकालत्वे स्वीकृते सत्यतीतं भवनमि
त्यर्थो नासीद्भूतस्याप्येककर्तृकमतीतं भवनमित्यर्थोऽज्ञाया च्छा दयोर्गयत् भावि शब्दार्थस्य आसीच्छब्दे नैतत् तथ्ये
नावेतं कालोभाविनयाभवदतं तद्विशब्दार्थमसीदित्यप्योः नावश्यकर्त्तव्यः स्वीकृते तु गोमानासीदित्यत्रापि गोमानिति व्यवहारविष
यमासीदित्यर्थः स्तुवस्यनदर्थीत्यादौ भूतलक्षणया यथा यथं लडादिः स्वीकर्त्तव्यः सोमयाजी त्वन्न तु भूत एवं णिनिप्रत्यये जा
तेपि भविष्यति लुङ्लसमभिहारे सति सोमयाजीति व्यवहरिष्यमाण इत्यध्याहारेण णिनेर्भविष्यदर्थे लक्षणया वा प्रयोगो भवेदि
ति किमनेन सूत्रेणेति चेत् अत्राहुः अध्याहारलक्षणाप्रभुक्तं क्लेशं विनैव साध्यप्रयोगनिर्वाहार्थं सूत्रारंभः न हि भाविकृत्यमासी
दित्यादौ क्वचिदध्याहारादिकमपत्याभवतीति तत्र वैचनत्वीकर्तुमुचितमिति क्रियासमभिहारे लोट् इति क्रियासमभिहारे द्योत्ये वा
र्थः लोट् तु योतक इति भावः तस्य च हिस्वौ स्तः इति ननु लोट इत्यनेन तिङो लक्षयित्वा तिङामेव हिस्वौ विधीयेतां तथा सति तिङ्त
त्वात्पदत्वं लभ्यत इति गुरोप्यनृत इत्याचलध्वमो विविवाक्यशेषो पि स्वरसतः संगच्छते अन्यथा येननाप्राप्तिन्यायेन हिस्वयोस्ति
ङपवादत्वे सति लध्वमोः स्थाने तयोर्विकल्पेन विधान संभवाद्रूतवाक्यशेषो रूपवाद इति चेत् अत्राहुः लोट् शब्दस्य तिङ्
लक्षणानमाप्या असंज्ञानविरोधित्वेनोपक्रमस्य प्राबल्यात् विषयस्य तस्माश्रयेण नवाक्यशेषस्योपपन्नत्वाच्च किं च तिङामा
देशत्वे तिपृतिसृमिपां स्थाने विहितस्य हेरस्थानिवद्भावेनपित्वात् ङित्वाभावे न तु नीहीत्यत्र इहल्यघोरितीत्वं न स्यात् इह

वादिसंबंधोऽनुपपन्नः स्वार्थस्मारणेनोपक्षीणत्वात्पदार्थसंसर्गो वाक्यार्थः कारकविशिष्टाक्रियाचेति स्वीकारात् शाब्दानुगमा
दतेन णात्वोऽस्ति प्रत्ययइत्यत्र रूपपाणात्वोपदेशद्योपि भाव्यस्तेइत्यभ्युपगमेपि शब्दस्य स्वार्थप्रत्ययकारणत्वेन तु शाब्दांतरं प्रति
तथा च धातुसंबंधो वाक्ये न न तु धातोः इति तस्य वाक्यार्थत्वासंभवात् शाब्दानुशाब्दे न धात्वर्थोऽलक्ष्यते न तु धातोः कर्मणः समानकर्तृ
कादिति सन्विधौ कर्मत्वं समानकर्तृकत्वं च धात्वर्थे कारकं विशेषणमाश्रितं तथा हि पिधात्वोरर्थकारकः संबंधोऽस्ति
ति चेन्मैवं तथा हि सति परस्परसंबंधार्थबोधकानेकधातुप्रयोग एव प्रत्ययास्युस्तत्र गोमान् आसीत् गोमान् भवितेत्यादि
न सिध्येत् न ह्यत्र सन्दर्शितस्य वर्तमानंकालो वा सि वर्तमानकालोऽस्ति प्रयुज्यते न चाप्रयुज्यमानस्य धात्वंतरेण संबंधो
ऽस्ति अर्थयोः संबंधात्स्युपगमेन तु धातुद्वयाभावेपि धात्वर्थद्वयस्य सत्त्वात् गोमानासीदित्यादेनानुपपत्तिस्तदेतदभिप्रेत्याह यथा
त्वर्थानामिति विषयवद्भूपेतं वद्वचनं एकैकविषयापेक्षायां तु धात्वर्थयोरिति बोध्यः एतच्च मनोरमानुसारेण व्याख्यानं के
चित्तु धात्वोरर्थकारकसंबंधेऽभ्युपगते गोमानासीद्भवितेत्यादिन सिध्येदिति मनोरमोक्तं चिंत्यमेवात्रतत्कारणं तदा च एतस्य
वलदस्यास्त्यस्मिन्निति सत्ताया एकत्वविवर्तमानत्वयोरविवक्षितत्वात्कृत्स्नानपेक्षत्वेन शक्तिभेदः न ह्यत्र तत्र तु विधौ वर्तमाने
लडित्यादावित्र कालविशेषपरिग्रहोऽस्तीत्याह तच्चाप्यकेयत्यादि अनुगुणं तथा हि आख्येमत्य इत्यनुवर्तमाने पुनरत्र प्र
त्ययग्रहणं किमर्थमिति यात्रितिप्यम् धातुप्रत्ययानामपि संबंधेसाधुत्वं यथास्यात् गोमानासीद्भविता वेति समाहितस्केपदे
न तु तदस्यास्त्यस्मिन्निति मतुप्प्रत्ययो वर्तमानसत्ताविशिष्टप्रचंडपत्र एवातीयते नान्यस्तथा च आसीद्भवितेति ति
ङंतपदानुरोधेन गोमानित्यत्र गावोऽस्यासन् भवितार इत्यतीताभावि सत्ताविशिष्टप्रकृत्यर्थयुक्तो विहितइत्युक्तं तथा
च मतुब्विधावस्तीत्यत्र एकत्वस्याविवक्षितत्वेपि वर्तमानत्वं विवक्षितमेवेति लब्धं वगम्यते किंच दृष्टिनमान्य
युक्ते वर्तमानसत्ताविशिष्टे एव आनीयते नान्यस्तथा च आसीद्भवितेति तिङंतपदानुरोधेन गोमानित्यत्र गा
वोऽस्यासन् गावोऽस्य भवितार इत्यतीतानागतसत्ताविशिष्टप्रकृत्यर्थयुक्तो मतुप्प्रत्ययः प्रकृतसूत्रेणैव विधीयते न

ल॰को॰
उ॰ति॰
८२

82

धीयते यदि तु हिस्वौ लोटस्तर्हि पि लोडाश्रयेणालोडं लकार्यं हंतचेति तत्पर्यविकल्पः सिध्यतीति न्वेत तर्हि स्यानिज्ञावलब्लोट
धर्मकौ स्वादिस्थर्यस्यानाश्रयणात् लोडादेशकार्यात् परस्मैपदात्मनेपदतिङ्संज्ञास्तु न सिध्यंति तथा च ह्रस्वौ कृते पुनस्तद्वत्स्यता
त् लोड्डे तो हि सादिरुच्यते तु स्थानिवद्भावेन हिस्वयोर्लोडं लकार्यं स्वरविकल्पः सिध्यति क्रियासमभिहारे लोडिति वाक्याल्लोडि
त्वं तु वर्त्स्य हिस्वौ लोडिति प्रागेव व्याख्यातत्वात् लोडादेशत्वज्ञावेन परस्मैपदात्मनेपदसंज्ञादेरप्यसिद्धं तीति समुच्चयेति वि
न्तोतेर्भावे एजित्यन्तु प्राग्[illegible]मिति धातोर्लोड् लोटो हि स्वौ त ध्वमोरिति विषयेत्यर्थः यथाविध्यनुप्रयोगः सर्वस्मिन् क्रियासमभिहारविष
ये श्रममसंख्याकारकादीनां हिस्वांताद्यप्रतीतेस्तद्बोधनायानुप्रयोगो न्याय्यत एव सा प्रसक्तदनुवादेन यथाविधीति नियम्यते तथा
च पत्ते मा प्रस्था नियमनाय याहि याहीति गच्छतीत्यादि न भवति यद्यप्यन्यतरस्यां सर्वार्थं प्राप्ता विस्तारो नियमशब्देन परिसंख्या
व्यवह्रियते सर्वनामस्थाने चेत्यादिना शीनतिनो च दीर्घप्राप्ते रन्यत्र लनिह्वलि परत्वाज्ञ्यापि हृकदाचिद्यातीत्यस्य क
दाचित्कृ छ्लीत्यस्य कदाचित्कृ छ्लीत्यस्यानुप्रयोगे प्राप्ते यथाविध्यनुप्रयोगमनाप्राप्त परिभ्रष्णीयन्नीहोनवहंतीत्यादिव विधी
यत इति नियमविधिरेव एतेन मीमांसकाप्रसिद्धनियमविधिः [illegible] प्रसिद्ध इति वदंतः परीस्ता क्रियाचारतिर्द्वंवाल्लिङ्ग हि
रूपक्रियाया व्याख्यात इति शब्दस्त्विति ——— नन्विति शब्देन व्यवधानात् [illegible] तीत्यस्यानुप्रयोगत्वं कथमिति चेत् अत्रा
हुः अनुप्रासस्य हानुवादिमात्र यरन्ना [illegible] विपरीत प्रयोगयोरिह प्राप्तिः एतच्च भाष्यभाकारीयोदाहरणस्तत्प्रत्याख्या
नाभ्यां निर्णीयते न च समुच्चये ध्यनुप्रयोग इति तु यथाविधीति नियमार्थं स्वीकर्तव्य मेवेति अन्यथा याहि याहीति गच्छ
त्यादिस्यादिति वाच्यं यस्माल्लोड्विधिस्तस्मादेति वा तिङं तस्यैवोपस्थितत्वेनानुप्रयोक्तुमर्हत्वान्नानूपस्थितत्वे नीतुम
ये[illegible] नित्वक [illegible] तिङंतस्यानुप्रयोगार्हत्वेति अत एव स्वं स्वरूपशब्दस्येत्यपि सूत्रं प्रत्याख्यातं भाष्यकारेण
अग्निर्हगित्यादौ विधिवाक्यगतं सांगारवाचकाग्निशब्दादेरुपस्थितत्वात्तस्य विध्यागेनानुपस्थितत्वान्न्यादिशब्देभ्योढगा
दिर्न भवति एवं चास्मिन्प्रत्याख्याते यथाविध्यनुप्रयोग सूत्रे मीमांसक प्रसिद्धनियमविधेः स्थितोदाहरणमन्यदन्वेषण
सामान्यवचनस्येति विशेषस्योक्तत्वात्तत्रैकदेशस्य सर्वस्मिन्निति पदस्यैवैयर्थ्यमस्तु नामयथा ४।५

राम॰
८२

हीत्य त्र्युच इति लीडागमे त्र वीहीति स्यात् तस्थाप्यन्तु स्तत्तह इति रामागमे त्रणोहीति स्यात् किंचलादेशामेवपरस्मैपदित्सन
पदसंज्ञेन तु लादेशा तिङादेशानामिति सर्वेषां तिङामावपि हिस्वौ पर्यायेण स्यातां न तु तिबादीनां हिस्तङां स्व इति पदव्यवस्था
या ललस्य लकारस्यैवादेशौ हिस्वौ न तिङामित्यव स्यस्यौ कर्त्तव्यामिति नन्वेवं दयोरपि लः परस्मैपदमिति परस्मैसंज्ञा स्यात् तस्य
परस्मैपदित्वप्र एव हिस्वौ स्यातामतश्राह लोचेति अयंभावः लोटो हिस्वौ इति वाक्ये क्रियासमभिहारे लोडिति वाक्याल्लोडित्य
नुवर्त्तते तत्र हिस्वाविति स्थस्य विशेषणं न च हिस्वौ लोटो भवत इति सामर्थ्याल्लोट्धर्मकाविस्यर्थः संपद्यते तथापि मुख्यो लोट्
संबंधिनो धर्मस्य पत्व यत्व स्यातिदेशो व्यर्थः स्थानिवत्त्वेनैव तत्सिद्धेः किंतु स्थानिवद्भावलब्धलोट्व्यपदेशकौ तिङ्भूतौ हि
स्वौ लयोरेव धर्मे इहातिदिश्यते इति सिद्धमिदं एवं च लोटो हिस्वाविति वाक्ये पूर्ववाक्यात् लोडग्रहणं नानुवर्त्तनीयमित्याकूतं ति
ङ पश्ये वेति तेन पदत्वं लिङः ति ह्या इति च भवति हिस्वविधानसामर्थ्यात् पदि हि पुरुषसंज्ञे स्वपि स्यातां तर्हि युष्मत्सामानाधिकरण्ये
एकत्वे च सत्येव हिस्वाभ्यां भाव्यं तत्र च व्यर्थो हिस्वविधिरिति भावः हिक्त्वादि स्वो भावकर्मकर्तृ विति उक्तं च केपटे नापि हिशब्द
स्यकर्त्तृनार्थः स्यात् सकर्मकस्य तु भावकर्मकर्त्तारः इति अत्र नवा अत्रेत्युक्ते रत्यादेः कपत्व च क्रियासमभिहारे लोडयं स्वार्थिक एव
नत्वास्मिन्लोडिति कर्माणि चेत्यार्थो नाम्रुपेयः प्रयोजनाभावात् पदि तु हिशब्दस्य कर्त्रर्थः स्यात् पुनः पुनरत्ति पयेन वा
यानेस्थले स्यार्थः इति वक्ष्यमाणग्रंथः स्वरसतो न संगच्छेत तथा हि पाहीत्यादौ तु कर्त्तादिप्रतीतिया तीत्यादि समभिहारेण सु
लभैव यथा एधां चक्रे इत्यत्र लडादेशाः ख्यागेन त्यागः परस्मैलेतु का मंत्रसं व्यप्रतीत्यभावे पि चक्रे इत्यनुप्रयोगवशेन भव
तीत्याङः स्यादेवत्र क्रियासमभिहारे हिस्वौ लोड्वाचतध्वमोरिति सत्तमस्तु तथा च हिस्वौ लोटो न भव लोड्धर्मकाविस्यर्थः
पूर्वोक्तरीत्या स्यादिति सर्वेपरिसिद्धौ किमनेन लोट इति ग्रन्थं तकरणेनेति चेत् अत्राहुः हिस्वयोर्यदि लोट्स्थानिकत्वं न स्वी
क्रियते तर्हि तयोर्लोडादेशत्वाभावेन इहत्यघोरित्यादि प्रवृत्त्या लुनीहि लुनीहीत्यादि सिद्धावपि हिस्वां तस्य लोडन्तत्वं न सिध्ये
त् तथा च हंतचेत्यनुदात्तविकल्पो न स्यात् हंत प्रलुनीहीत्यं लुनाति एवं च लोडन्तत्वेन [illegible] लाभार्थं लोटो हिस्वाविति वि

यमिति दिक् एवमिति याहि याहीति यातः याहि याहीति यांतीत्यत्र विशेषेत्यमित्यर्थः पठेरिति बाधनध्वमो विति पुनःत्वात् हिस्वा
भावपदेइत्यर्थः तध्वमोरित्यर्थेन वाह्येन मध्यमपुरुषबहुवचनं गृह्यते धेसाहचर्यात् यद्यपि ध्वमित्यस्य स्थाने पदत्वमस्ती
ति तहत्साहचर्येतप्यमपुरुषैकवचनस्य ग्रहणं प्राप्नोति तथापि बहुवचनत्वमध्यमत्वरूपधर्माभ्यां प्रथमं मध्यमपुरुषबव
हुवचनमेव ग्रहस त इत्याशयेनोदाहरति यातयातेति वयमिति अस्यापि लोटो लङ्वत्त्वात्तस्थस्थमिपामिति याते त्यत्र थ
स्य तादेशः विध्यादिलोड्विषये त्वनुप्रयोगेपि थस्य तादेशप्रवृत्तेः एवं यातेत्यनुप्रयोक्तव्यं अधीध्वे इति विध्यादिलोड्विषये
तु समाभ्यां वा प्राप्ति तिप्रवृत्ते वधीध्वमित्यनुप्रयोक्तव्यं भावकर्मणोस्तु भूयतां भूयस्वेति भूयते पच्यस्व पच्यस्वेति पच्यते इत्या
द्युन्नेयं समुच्चयेऽन्यतरस्यामिति सूत्रे क्रियासमभिहार इत्यननुवर्तनात् द्वित्वमप्रसक्तमेवोदाहरति सक्तून् पिब धानाः खा
देति अभ्यवहरस्येति विध्यादिलोड्विषये त्वभ्यवहरतेत्यनुप्रयोक्तव्यं एवमभ्यवहरध्वे इत्यत्राप्युक्तविषये अभ्यवहरध्वमित्य
नुप्रयोक्तव्यं पठे स्वाविति पिबतादेत्यभ्यवहरध्वमुं त्वत्रा स्वादस्वेत्यभ्यवहरध्वे इत्युदाहार्यम् लवनाहीति आदिशब्देन
मोषणहरणमाहो अनुक्तत्वभ्युपगमे बाधमाह लोडंतस्येति भ्रमस्वेति पुरुषांशे वचनांशे च लोडंशे तु प्रथमे वेति भावः
एवमुक्तोदाहरणेषु हिस्वौ लेषु तिङन्तत्वं यथायथं परस्मैपदात्मनेपदत्वं च सिद्धं पुरुषवचने संज्ञे तु विपानस्तामप्यां द्वित्व
योनस्त इत्युक्तमिति सर्वं सुसिद्धिः ॥ इति श्रीपरमहंसपरिव्राजकाचार्यश्रीवामनेन्द्रस्वामिचरणारविंदसेवकज्ञाने
न्द्रसरस्वतीकृतौ सिद्धांतकौमुदीव्याख्यायां तत्त्वबोधिन्याख्यायां तिङन्तप्रकरणं संपूर्णं ॥ राम राम कृष्ण कृष्ण ॥

ऽ। ० ऽऽ ऽऽ ऽऽ ऽऽ ऽऽ ऽऽ ऽऽ ऽऽ ऽऽ ऽऽ ऽऽ ऽऽ ऽऽ ऽऽ ऽऽ ऽऽ ऽऽ ऽऽ

84